दिनाङ्क :- 21/03/2025 सायम् - 06:20

<u>मुख्यवार्ताः</u>

- लोकसभया जलशक्ति-मन्त्रालयस्य अनुदान-याचिका पारिता। अद्य राज्यसभायां गृहमन्त्रालयस्य कार्यविषये चर्चा पुनः प्रारब्धा।

- अस्मिन् वर्षे भारतं क्षयरोगमुक्तराष्ट्रं भवितुं द्रुतगत्या अग्रे सरतीति स्वास्थ्य राज्यमन्त्रिणा अनुप्रिया पटलेन उक्तम्।

- लण्डन-नगरे हीथ्रो-विमानस्थानकं विद्युत्-उपकेन्द्रे जातस्य भीषणाग्नेः कारणात् चतुर्विंशति-होराभ्यः पिहितं जातम्।

- भारतेन त्रिंशोत्तर-द्विसहस्रतमे वर्षे गुजरातस्य अहमदाबादनगरे राष्ट्रमण्डलक्रीडायाः शताब्दिम् आयोजनार्थम् आधिकारिक-रूपेण रुचिः प्रदर्शिता।

- सततभविष्याय वनानां महत्वपूर्ण-भूमिकायां जागरूकताम् संवर्धयितुम् अद्य अन्ताराष्ट्रियवनदिवसः आचर्यते।

<u>लोकसभा</u>

प्रशासनेन जल-जीवनोपक्रमस्य अन्तर्गतं साम्प्रतं यावत् देशस्य द्विपञ्चाशल्लक्षाधिक-पञ्चदश-कोट्यधिकेषु ग्रामीणगृहेषु नलिकाजलपूर्तिं कृतम्। लोकसभायां स्वीय-मन्त्रालय-सम्बद्धानुदानानां याचनाविषये चर्चायाः उत्तररूपेण केन्द्रीय-जलशक्ति-मन्त्री सी.आर्.पाटिलः अवदत् यत्, यदा नवदशाधिक-द्विसहस्रतमे वर्षे जलजीवनोपक्रमः प्रारब्धः, तदा केवलं त्रि-कोटि-ग्रामीण-परिवारेषु नलिका-जल-सौविध्यः आसीत्। मन्त्रिणा उक्तं यत् यदि देशस्य प्रत्येकस्मिन् गृहे सुरक्षितं पर्याप्तं च पेयजलापूर्तिः भवति तर्हि प्रतिवर्षं प्रायः षट्त्रिंशत्-सहस्राधिकैक-लक्षबालानां मृत्युं निवारयितुं शक्यते।

श्रीपाटिलः सूचितवान् यत् केन्द्रेण पेयजले सम्बद्धक्षेत्रेषु च वित्त-सङ्कल्पना-पत्रके गत-यूपीए-प्रशासनस्य अपेक्षया चतुर्गुणितं यावत् वृद्धिः कृता।

## राज्यसभा

अद्य राज्यसभायां गृहमन्त्रालयस्य कार्यविषये चर्चा पुनः प्रारब्धा। चर्चायां भागम् अगृह्णन् भाजपा-दलस्य डॉ. सुधांशु त्रिवेदी अवदत् यत् गृहमन्त्रालयेन जम्मू-कश्मीरतः सप्तत्यधिक- त्रिशतम् इति अनुच्छेदं निरस्तं कृत्वा देशं धर्मनिरपेक्षं कर्तुं कार्यं कृतम्। असौ महाकुम्भायोजनस्य अपि प्रशंसां कुर्वन् उक्तवान् यत् अस्य बृहदायोजनावधौ कापि अप्रिय-घटना न अभवत्, यत् सुरक्षासेनानां कार्यक्षमतां दर्शयति इति।

दिल्ल्यां वर्धमानस्य अपराधस्य विषये, काङ्ग्रेस्-दलस्य सांसदः अजय-माकन् अवदत् यत् दिल्ल्यारक्षि-बलं प्रत्यक्षतया गृहमन्त्रालयस्य अधीनम् आगच्छति। असौ उक्तवान् यत् दिल्ल्यां महिलानां, बालकानां, वरिष्ठनागरिकाणां च विरुद्धं अपराधस्य दरं सर्वाधिकम् अस्ति। आम-आदमी-पार्टीति दलस्य सञ्जय-सिंहः अशेषे अपि देशे वर्धमानस्य अपराधस्य विषये प्रशासनम् उद्दिश्य प्रश्नम् अकरोत्, अकथयत् च यत् दिल्ली अपराधस्य केन्द्रं जातम्। केन्द्रीयगृहमन्त्री अमितशाहः अद्य अवदत् यत् नरेन्द्रमोदी प्रशासनस्य आतङ्कवादस्य विरुद्धं शून्य-सहिष्णुता-नीतिः अस्ति। असौ अवदत् यत् एन्.डी.ए प्रशासनेन जम्मू-कश्मीरे आतङ्कवाद-कारणेन सञ्जाता मृत्युसङ्ख्या सप्तति-प्रतिशतं यावत् न्यूनीकृता, सहैव आतङ्कवाद-घटनासु अपि तीव्ररूपेण अपचितिः दृष्टा। श्रीशाहः अवदत् यत् सप्तत्यधिक-त्रिशतम् इति अनुच्छेदं निरस्तं कृत्वा मोदी-प्रशासनेन 'एकं संविधानं, एकः ध्वजः' इति संविधाननिर्मातृणां स्वप्नं पूरितम्। गृहमन्त्रिणा बलं प्रदत्तं यत् पूर्वं आतङ्क्याक्रमणानाम् अनन्तरं किमपि कार्यं न कृतम् आसीत्, तथा च जनाः तान् विस्मरन्ति स्म।

## क्षयरोगमुक्तराष्ट्रम्

अस्मिन् वर्षे भारतं क्षयरोगमुक्तराष्ट्रं भवितुं द्रुतगत्या अग्रे सरतीति प्रशासनेन उक्तम्। देशे क्षयरोग-प्रकोपस्य मानं पञ्चदशोत्तर-द्विसहस्रतमे वर्षे सप्तत्रिंशदुत्तर-द्विशतं प्रतिलक्ष-जनसङ्ख्यातः त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे पञ्चनवत्यधिकैक-शतं प्रतिलक्ष-जनसङ्ख्यां यावत् प्रायः सप्तदशमलवोत्तर-एक-सप्त-प्रतिशतं यावत् न्यूनतागता अस्ति। लोकसभायां प्रश्नकालावधौ पूरकपत्राणां उत्तरं यच्छन्त्या स्वास्थ्य-राज्यमन्त्रिणा अनुप्रिया पटेल इत्यनया उक्तं यत् पञ्चदशोत्तर-द्विसहस्रतमस्य वर्षस्य अपेक्षा यां त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे क्षयरोगेण मृत्युमानेशु अपि एकविंशतिः प्रतिशततोप्यधिकं न्यूनतागता।

## लण्डन-हीथ्रो

लण्डन-नगरे हीथ्रो-विमानस्थानकं विद्युत्-उपकेन्द्रे जातस्य भीषणाग्नेः कारणात् चतुर्विंशति-होराभ्यः पिधानं जातम्। विद्युदापूर्तिः बाधितास्ति, षोडश-सहस्राधिक-गृहाणि विद्युत्-रहितानि जातानि। इदं हीथ्रो-विमानस्थानकं विश्वस्य व्यस्ततमेषु विमानस्थानकेषु अन्यतमम् अस्ति।

## शिवराज-कृषि

केन्द्रीय-कृषि-कृषक-कल्याणमन्त्रिणा शिवराजसिंह-चौहानेन विपक्षि-दलैः आग्रहः कृतः, यत् यदि सांसदाः संसदि कृषिविषये चर्चायाः अवसरं दास्यन्ति तदैव कृषकाणां कल्याणाय कार्यं अग्रे भवितुं शक्नोति इति। संसदः बहिः वार्ताहरैः सह वार्तालापं कुर्वन् श्रीचौहानः अवदत् यत् केन्द्रप्रशासनं संसदि कृषकाणां विषयेषु चर्चां कर्तुं सर्वदा सज्जम् अस्ति। सः अवदत् यत्, कृषकाणां कल्याणं मोदीप्रशासनस्य सर्वोच्चप्राथमिकता अस्ति।

## तमिलनाडु

समुचित-परिसीमन-विषये प्रथमोपवेशनं श्वः चेन्नई-नगरे भविष्यति। डी.एम्.के. दलस्य नेतुः मुख्यमन्त्रिणः च एम्.के. स्टालिन् इत्यस्य नेतृत्वे अस्मिन् उपवेशने आन्ध्रप्रदेश-केरल-कर्नाटक-तेलङ्गाना-ओडिशा-पश्चिमबङ्गेषु विभिन्नदलानां राजनैतिक-प्रतिनिधयः नेतारः च सम्मिलिताः भविष्यन्ति। चर्चायाः प्रथमे चरणे परिसीमन् सङ्घवादं च समेत्य विभिन्नविषयेषु चर्चा भविष्यति।

## भारत- सीडब्ल्यूजी

भारतेन त्रिंशोत्तर-द्विसहस्रतमे वर्षे गुजरातस्य अहमदाबादनगरे राष्ट्रमण्डलक्रीडायाः शताब्दिम् आयोजनार्थम् आधिकारिक-रूपेण रुचिं प्रदर्श्य वैश्विकक्रीडा-कार्यक्रमाणाम् आतिथ्यं प्रति एकः प्रमुख-पदक्षेपः उत्थापितः। भारतीयराष्ट्रमण्डल-क्रीडासङ्घस्य अध्यक्षेण पीटी उषा इत्यनया सहमति प्रकटिता यत् अहमदाबादम् आतिथ्यं कर्तुं तत्परः अस्तीति। अयं पदक्षेपः षड्त्रिंशोत्तर-द्विसहस्रतमे वर्षे राष्ट्रमण्डलक्रीडाः समेत्य प्रमुखान् अन्तर्राष्ट्रीय-कार्यक्रमान् सुरक्षितुं भारतस्य व्यापक-महत्वाकाङ्क्षायाः अनुरूपम् अस्ति।

## अन्ताराष्ट्रियवनदिवसः

अद्य अन्ताराष्ट्रियवनदिवसः आचर्यते। अस्य वर्षस्य विषयः अस्ति 'वनानि खाद्यानि च' यत् स्वस्थवनानां वैश्विकखाद्यसुरक्षायाश्च महत्त्वपूर्णसम्बन्धे बलप्रदानम्।

।। इति वार्ता:।।